# Sankirna Padyani

# सङ्कीर्णपद्यानि

## Document Information

Text title : Sankirna Padyani

File name : sankIrNapadyAni.itx

Category : vishhnu, vishnu, moropanta, raama, hanumaana

Location : doc_vishhnu

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# सङ्कीर्णपद्यानि

१

(१)वातनन्दनमनःशान्तिकरचरणजलजात कुशतात कारुण्यसिन्धो!
शातकुम्भाभपट पातकापह धरणिजातपःफल दीनलोकबन्धो! ।
राम राजीवदलनयन रघुवीर रविवंशभूषणरत्न रावणारे ! -ध्रुव०॥ १॥

(२)चापोनिगमान्तग सदापदपहाररत तापसाराध्यपद पुण्यमूर्ते! ।
(३) क्ष्मापवर (४)कुसुरवनितापवादाघसन्तापभञ्जन भुवनगीतकीर्ते! राम ॥ २॥

रक्षसामन्तचतुर क्षमापालनपर क्षपानाथजितवदनकान्ते ! ।
रक्ष (५)रोमजमुदार क्षमादिगुणनिकरक्षय स्मृतिरस्तु मयि तवान्ते !राम ॥ ३॥

२

कथं तं न भजे पावनकथम् । शमितामितहृद्व्यथं कथं -ध्रुव०॥

त्रातुं (६)क्षममनलसमखिलं जगदिदं खलु यथातथं ।
कुर्वतं शरणागतसमवनमतुलविपदि सशपथम् । कथं०॥ १॥

परितसंश्रितजनघनधनतनयाद्यखिलमनोरथं ।
(७)कमलावरमजममलाशयमरिकरमण्डजवररथम् । कथं०॥ २॥

भक्तमयूरदयाघनमिनकुलपतिमतिभावुकपथं ।
यमभजतो जनुरमपतेरपि वरमपि भवति वितथम् । कथं०॥ ३॥

३

वक्ष सकलभक्तवृन्दरक्षणप्रवीणचरण दक्षमहाध्वरविनाशदक्ष चन्द्रगिरिपयो-
वलक्षदेह रक्ष मां द्रुतं
यक्षनाथसख भवाभिधार्युपद्रुतं
न क्षमत्यज क्षमस्व बहुभयाद्रुतम् ॥ १॥

शङ्करेगा शिव शरण्य शमशेवधे! -ध्रुव०॥

स्वर्वधूसमर्चिताङ्घ्रिपर्व समुदितेन्दुकान्तिगर्वतस्करास्यपद्म पर्वतेन्द्रजाधव गन्धर्व-
गीतगुणजगत्पते
शर्व! । कुर्वये! दयां त्वदङ्घ्रियुगनते
सर्वभुवननाथ न समुचितमदो नते । शङ्करेश ॥ २॥

भालदृगाविर्भवत्करालवीतिहोत्रखरज्वालदग्धरतिप्राणपाल सज्जनस्वमान-
सालयाद्य पालयाकुलं
व्यालमुण्डमालधर न मेऽन्यदिह बलं
कालकूटकण्ठ समव (८) रामसुतमलम् । शङ्करेश० ॥ ३॥

४

(९)कुण्डलीशशयन मकरकुण्डलिननन्तगुण मृकण्डतनयदर्शितचिदखण्डमोदरूप सदघखण्ड
नैकपण्डितप्रभो!
पुण्डरीकवरद भुवनमण्डनाद्य भो! ।
पुण्डरीकनयन शमय भवभयं विभो ! । ! ॥ १॥

पाण्डुरङ्ग मामिहाव शरणागतं -ध्रुव० ॥

चण्डपराक्रम स्वभुजदण्डबलविमर्दितारिमण्डलानवद्यगुणकरण्ड (१०)मुकुलतलस्व
च्छगण्डतुस्तुण्डजनितनो(११) !
खण्डपरशुजप्यनामधेयसन्मनो
अण्डकूपरोमकूपसकलतनुतनो! पाण्डुरङ्ग ॥ २॥

अण्डजेन्द्रवाहन वेतण्डपरित्राणपटूद्दण्डदयाधारहृदाखण्डलानुजने शिरस्यञ्जलिं
निधाय नुतिरतं
दण्डवत् प्रणम्य चिन्तयन्तमविरतं
दण्डपाणिभीतिमलं रामसुतमितम् । पाण्डुरङ्ग ॥ ३॥

५

ब्रह्मपुरन्दरमुखवृन्दारकवृन्दवन्द्यमीश्वरं
मन्दरमन्दिरमिन्दीवरदलरुचिबन्धुरकन्धरम् ॥ १॥

वन्दे मन्मथहरम् । हरं तं -ध्रुव० ॥

हिमनगपतिनिजदुहितृमुखसलिलरुहमधुरसमधुकरं
स्वचरणयुगपरिचरणरतहृदयजनसमुदयसुखकरम् । हरं तम् ॥ २॥

वामदेवममितामरनुतपदतामरसं सुखकरं

रामतनूजभवामयवैद्यमकामदत्तपरवरम् । हरं तम् ॥ ३॥

इति श्रीरामनन्दनमयूरेश्वरकृता सङ्कीर्णपद्याणि समाप्ता ।

१। वातनन्दनो हनूमांस्तस्य मनःशान्तिकरं चरणजलजातं चरणकमलं यस्य नत्सम्बुद्धौ । “शात” इति लिपिकरप्रमादः ।

२। धनुर्वेदपारग ।

३। भूपतिश्रेष्ठ

४। कुसुरो भूसुरो गौतमः ।

५। रामजं रामनन्दनं मयूर कविम् ।

६। अनलसमालस्यरहिनम् ।

७। अरिकरं चक्रपाणिम् ।

८। समव सम्यक्तया रक्षेत्यर्थः ।

९। कुण्डलांशः साधिराजः । शेष इति यावत् ।

१०। रलयोरभेदान्मुकुलो मुकुरः । दर्पण इत्यर्थः ।

११। चतुस्तुण्डो ब्रह्मा ।

Proofread by Rajesh Thyagarajan

*Sankirna Padyani*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*